षट् पङ्क्तिर्मुनयो धृती धरणिपा एकोनता विंशति(ते): ।
अत्यष्टिर्मुनयो नखा इति विदुर्नाथा इमे खेचराः
सप्तार्चिर्भगविश्वभादिनवकर्क्षाणां दिनेशादयः ॥
६. १०. ७. १८. १६. १९. १७. ७. २०,

End:

दारपुत्रविरोधं च गमनं कार्यनाशनम् ।
द्वितीये मीनराशौ वा देहबाधा भविष्यति ॥
तद्दोषपरिहारार्थं मृत्युञ्जयमथाचरेत् ।
छागदानं प्रकुर्वीत सर्वसंपत्प्रदायकम् ॥

Colophon:

इति श्रीवृद्धपाराशरसूत्रे षड्विंशोऽध्यायः ॥

(*b*) मञ्जरीयोगः.

MAÑJARĪYŌGAḤ.

Foll. 33*a*—35*b*.

This work is astrological. It chiefly describes how prosperity attends a person under certain specified circumstances when the stars are in certain peculiar positions

Copied on Tuesday, the 14th of the dark fortnight of Caitra.

Complete.

Beginning:

लग्नात् सप्तमगे चन्द्रे चन्द्रादष्टमगे रवौ ।
चतुर्थस्थानगे शुक्रे [कु]सुमयोग इतीरितः ॥
कुसुमे योगे जातो भूपालो बन्धरक्षको विनीतश्च ।
ग्रामपुरनगरकर्ता विंशद्वर्षात् परं तु षड्वर्षम् ॥

End:

विभावसोर्योगजवंशनाथो बह्वर्थदातार्यसमन्वितः स्यात् ।
द्विसप्तवर्षात् परमष्टवर्षे देशाधिपत्यं नृपलाञ्छनं च ॥

(*c*) राजयोगः.

RĀJAYŌGAḤ.

Foll. 36*a*—39*b*

Similar to the above.

Complete.

Copied and completed on the 30th day of the Caitra month.

Beginning:

विविधशास्त्रसुपूर्णकलेवरः कनकरत्नधनी प्रभुदर्शनः ।
नृपतिवंशभवो जनवल्लभः भवति देवगुरुस्तनुगोचरः ॥

End:

अर्धमेकगृहस्त्रिकोणगान्त्यं श(स)मस्तगृहगस्त्वरांशगः ।
पादमत्र चतुरष्टसंश्रये पापयेत्य(?)जानिजैः फलैर्ग्रहैः ॥

(*d*) अष्टकवर्गः—आन्ध्रटीकासहितः.

ASṬAKAVARGAḤ: WITH TELUGU MEANING.

Foll. 40*a*—47*b*.

Deals with the details of calculation to be made for verifying the accuracy or otherwise of one's horoscope.

Complete.

The transcription was completed on Friday, the 2nd of the bright fortnight of the month of Vaiśākha.

Beginning:

तिर्यग्विश्वोर्ध्वनष्टं गिरिशगिरिपदं न्यस्तचक्रं तदूर्ध्वे
मेषाद्या राशयः स्वोद्गहगणसहितं शिष्टमेष्टश्च पद्मम् ।
तस्यार्धः सौरिमुख्यां खचरपतियुतां जन्मलग्नं लिखेच्च
न्यस्याद्धन्वीयचक्रे स्वपदसहितभास्वांशके बिन्दुरेखाः ॥

టీకా :—

నిమపు ౧౩ రేఖలున్ను వెడల్పు ౧౦ రేఖలున్ను తీస్తే నూటయెనిమిది ౧౦౮ యిళ్ల చక్రమవును.

End:

लग्नेन्दुरविणा मध्ये बलाधिकदशादिमा ।
ततः केन्द्रस्थितानां च ग्रहाणां च दशाः स्मृताः ॥

* * * *

శుభగ్రహమైన పాపగ్రహమైన లగ్నానకు గ్రహాలలో బలిష్ఠగ్రహం యేదో వానిదశ అత్యుత్కృష్టదశ.

Colophon:

अष्टकवर्गस्समाप्तः ॥

(*e*) **पर्यायजातकम्—आन्ध्रटीकासहितम्.**

PARYĀYAJĀTAKAM: WITH TELUGU MEANING.

Foll 48*a*—51*b*.

Specially deals with the method of forecasting the length of one's life by means of astrological calculations.

Complete.

Copied and completed on Saturday, the 3rd of the bright fortnight, in the month of Vaiśākha.

Beginning:

दिनेशजन्मेशसुहृत्समादिता सुदीर्घमध्याल्पचरादिषु क्रमात् ।
तत्कालमित्रारिसमानखेटः पर्यायपाकेन विशोध्यमायुः ॥

టీకా:—

దినేశఅనగా సన్య(?)పరంగా అష్టమాధిపతి జన్మేశ అనగాను లగ్నాధిపతి వీరిద్దరికిన్ని తత్కాల మిత్రసమ శత్రుక్షేత్ర నవాంశలమీదను దీర్ఘాల్పాయుర్దాయాలు చూమకునేది।

End:

पापान्वितास्तु ये भावास्ते भावा नाशतां ययुः ।
सौम्यैर्वृद्धिकरा ज्ञेया मिश्रैर्मिश्रफलप्रदाः ॥

టీకా :—

భావబలం అధికమయి వున్నయెడల ఫలవృద్ధిన్ని అధికమైవుండును.
మిశ్రగ్రహములు భావమందువున్నయెడల మిశ్రఫలమేయివును ॥

Colophon:

इति पर्यायजातकं सम्पूर्णम् ॥

(*f*) **षडशीतिः.**

ṢAḌAŚĪTIḤ.

Foll. 52*a*—56*b*.

A general treatise on horoscopy in astrology.

Complete in 86 stanzas.

Copied on Sunday, the 4th of the bright fortnight of the Vaiśākha month.

Beginning :

अश्विनी भरणी चैव कृत्तिकापादमेव च ।
राशिरङ्गारकस्यैव मेषराशिर्विधीयते ।।

मेषे जातो राजपूजितः स्थिरारम्भः विचक्षणः वातरोगी प्रवास-
निरतः स्वदारपरित्यागी स्वदारासक्तः प्रशमान्वितमानसः ।

End :

चैत्रमासे शुक्लपक्षे दशम्यां गुरुवासरे ।
मखानक्षत्रे रात्रौ द्वितीययामे महादेवनामोद्देशे मुमुक्षुः ॥

(*g*) जैमिनिसूत्राणि—आन्ध्रटीकासहितानि.

JAIMINISŪTRAS: WITH TELUGU MEANING.

Foll 57*a*—76*b*.

Similar to the above. Theee are also called Upadēśasūtras.

Copied and completed on Monday, the 3rd of the bright fortnight, in the month of Jyēṣṭha.

Adhyāyas one and two.

Beginning :

उपदेशं व्याख्यास्यामः । द्विपदं त्रिपदं चतुष्पदम् ।सूत्रं चाह ।
अभिपश्यन्ति ऋक्षाणि ।

టీకా :—

మేషాది ద్వాదశ రాసులున్ను తమతమకు యెదురైన రాసులన్నవాని
జూచును। మేషానకు వృశ్చికం వృషభానకు తుల।

* * * *

Colophon :

इत्युपदेशसूत्रे योगाध्यायस्य चतुर्थः पादः ॥

End :

मीनमेषान्वितश्चन्द्रः सततं दक्षिणान्नतम् ।
शेषाच्चोत्तरासङ्गं समं तु वृषकुम्भयोः ॥

चरस्थिरान् पञ्चमरन्ध्रलाभान् स्थिरा(न्)तृतीयं नवमं च षष्ठम् ।
चतुर्थमेपूरणसप्तमर्क्षान् तथोभयाख्याः प्रविलोकयन्ति ॥
इत्युभयचक्रवशेनैव द्रष्टव्यम् ॥

(*h*) नक्षत्रविवरणम्.

NAKṢATRAVIVARAṆAM.

Foll. 77*a*—92*b*.

An astronomical pamphlet in which the author finds out the exact position on the earth's surface of Bobbili in the Godavari district, and taking that place as the meridian determines the positions of the planets and other celestial bodies: by Koṭikalapūḍi Kōdaṇḍarāma.

Complete.

Copied on Monday, the 4th of the bright fortnight, in the month of Nija-Bhādrapada.

Beginning:

राकासुधांशुद्युतिमच्छरीरां राजीवगर्भाननसौधसंस्थाम् ।
रामामणीं रञ्जितभक्तलोकां नमामि देवीं नतदेवदेवीम् ॥
कोड(टि)कि(क)लपूडिकुलीनः कोदण्ड्रामाह्वयो महाविबुधः ।
नक्षत्रविवरणाख्यं वक्ष्ये ग्रन्थं हिताय लोकानाम् ॥
स्कन्धत्रितये यद्यत्कथितं मययवनशक्तिमुखपूर्वैः ।
नक्षत्रविषयमखिलं तत्तत्सर्वं विवृण्महे बुद्ध्या ॥

శ్రీ సూర్య సిద్ధాంతమతమును అవలంబించి సోమసిద్ధాంత బ్రహ్మసిద్ధాంతార్య భటసిద్ధాంత గౌరిసిద్ధాంత సిద్ధాంత శిరోమణి ప్రముఖ గ్రంథములయందు చెప్పబడ్డ తదవిరోధి వాక్యములను నిలుపుకొని శ్రీ కూర్మక్షేత్రానకు పశ్చిమంగా సమీపమందున్న బొబ్బిలి పట్టణానకు విశేషపయోగంగా ధనాయ నాంశలు ౨౧ ౦ ౦ అయివర్ధిల్లుతూవున్న సమయమందు కోటికలపూడి కోదండరామయ్య అనే వాక బ్రాహ్మణుడు, ఈ గ్రంథము ఆంధ్రగీర్వాణ భాషలచేత రచిస్తూవున్నాడు. బొబ్బిలి పట్టణానకు ద్వాదశాంగుళ శంకువల్ల తెలిసిన విషువచ్ఛాయాంగుళములు ౪ ౦ అయినందున ఈ విషువచ్ఛాయవల్ల గణితరూపకంగా యీ బొబ్బిలి పట్టణానకు

వచ్చిన అక్షసంఖ్య లంబిజ్యాదివర్గా పరోబస్తా సిద్ధాంత పరికరమున్నూ నక్ష
త్రధ్రువాక్షదృక్కర్మ విక్షేపక్రాంత్యాదులున్నూ జాపితా రూపంగా వ్రాస్తు
న్నాను.

End:

రేవతి కృత్తిక.—౪ పాదం. పు. ౧-౹౦, పు. 3-౨3, అ. -౫౪౫. మ.౭ ౧౧ పు. ౭ ౫౧, ఉ॥౨-౬౪౪, బు. ౫౪-౨౭, ౧౦, శాలివాహన శకం. ౧౭-౭3, కాగాప్రజోత్పత్తి సం॥ నిజభాద్రపద శు. ౪ సోమవారంవరకు నక్షత్ర వివరణ శ్రీ రామార్పణంగా ఆత్మార్థమై కల్లూరి వీరయ్య వ్రాసుకొనెను.

(*i*) नक्षत्रचूडामणिः—आन्ध्रटीकासहितः.

NAKṢATRACŪḌĀMAṆIḤ : WITH TELUGU MEANING.

Foll. 93*a*—120*b*.

Deals with the differentiating characteristics of the several zodiacal asterisms according to Indian astrology.

The scribe's date is given as Monday, the 12th of the bright fortnight of the month of Nija-Bhādrapada.

Complete.

Beginning:

अ(ह)स्त्यश्वबन्धरथयानपुरप्रवेश-
भैषज्यमन्त्रगृहपार्श्वसुरप्रतिष्ठा ।
यात्राभिषेकमखदीक्षणचौलमौञ्जी(:)
कुर्वन्ति शान्तिकविधानमथाश्विनीषु ॥

चूचेचाला अश्विनी । कृष्णवर्णम् । त्रितारा । अश्वमुखाकृतिः । पुमान् । देवगणम् । योन्यश्वम् ।

* * * *

భోక్తా శకల ‥ డును ధర్మిష్ఠుని తేజస్విని ధనధాన్య సమృద్ధికలవాడున్ను ।

End:

अथवा सर्पभयम् । त्रिंशद्वर्षे शस्त्रभयम् । अथवा ज्वरभयम् । चत्वारिंशद्वर्षे अपमृत्युः । अष्टषष्टिवर्षे महाकण्टकः । अस्मिन् परिहृते सति अशीतिवर्षाणि परमायुः ।

Colophon:

नक्षत्रचूडामणिः संपूर्णः ॥

(j) नक्षत्रजातफलम्— आन्ध्रटीकासहितम्.

NAKṢATRAJĀTAPHALAM: WITH TELUGU MEANING.

Foll. 121*a*—122*a*.

Determines the characteristics of persons born under the influence of the various lunar asterisms.

Complete in 28 stanzas.

For the date of copying see under the previous work.

Beginning:

अश्विन्यादिनक्षत्रेषु जातानां नराणां गुणा विलिख्यन्ते श्लोकैरष्टाविंशतिभिः ।

अश्विनी—

रूपवान् गुणवान् दक्षो मतिमान् भूषणप्रियः ।
शूरः स्त्रीलोलुपो मानी दस्रभे जायते नरः ॥

టీ.—అశ్వినీ నక్షత్రమందు పుట్టినవాడు యీ శ్లోకములో చెప్పిన గుణములు కలవాడున్నూ ।

End:

रेवती—

रूपवान् धनवान् भोगी पण्डितः स्वभुजाध्य(र्ज्य)भुक् ।
कामी दुर्गणितः शूरः पौष्णजः परदेशगः ॥

Colophon:

सप्तविंशतिनक्षत्रजातोद्भवफलं समाप्तम् ॥

(k) नक्षत्रपादजातफलम्—आन्ध्रटीकासहितम्.

NAKṢATRAPĀDAJĀTAPHALAM: WITH TELUGU MEANING.

Foll. 122*b*—127*b*.

Similar to the above.

Complete.

Copied on the day following that on which the previous work was copied.

Beginning :

एकैकस्य नक्षत्रस्य चतुष्पादाः सन्ति । सप्तविंशतिनक्षत्राणामष्टोत्तरशतपादा भवन्ति । तेषु जातानां मनुष्याणां गुणाः श्लोकरूपेण लिख्यन्ते—

అశ్విని ప్రథమపాదమందుపుట్టిన జాతక ఫలం.

पिशुनश्चपलो नष्टः पापकर्मनिराकृतः ।
परेषां व्यसने सक्तः अश्विन्यादौ प्रजायते ॥

టీ.—అశ్విని ప్రథమపాదమం౯ పుట్టిన జాతకుడు యీ శ్లోకఫలమును పొందువాడు యిరవైయేడు నక్షత్రములకు నక్షత్రం ౧ కి ౪ పాదములతో అయ్యె ౧౦౮ పాదములకు చెప్పబోయే పాదములు యీ శ్లోకప్రకారంగానె చూచుకోతగ్గది.

रेवती ४ पादे—

कुलान्तकः शुची धीरः सत्यवादी विचक्षणः ।
क्रूरो रिपुविनाशः स्यात् रेवत्यन्ते प्रजायते ॥

టీ.—యిరవైయేడు నక్షత్రముల యొక్క పాదము ౧౦౮ వీటియందు పుట్టిన జాతక ఫలం సంపూర్ణ ॥

(*l*) गण्डान्तविषयः.

GAṆḌĀNTAVIṢAYAḤ.

Foll. 128*a*—132*a*.

Enumerates those inauspicious occasions which prove injurious to the person who does anything or to whom anything happens on those occasions.

Complete

Copied on the day next to that on which the previous work was copied.

Beginning :

पूर्णनन्दाख्यतिथयो सन्धिर्नान्ते चतुष्टयम् ।
उद्वाहजन्मयात्रासु गण्डान्तं निधनं भवेत् ॥

तथा—

अमाप्रतिपदोर्मध्ये पञ्चमे षष्ठिमध्य[मध्य]मम् ।
दशम्येकादशीमध्यं तिथिगण्डं प्रकीर्तितम् ॥

టీ.—పాడ్యమి షష్ఠి ఏకాదశులు నంద తిథులనిన్ని ద్వితీయ సప్తమి ద్వాదశులు భద్ర తిథులనిన్ని తృతీయ అష్టమి త్రయోదశులు జయ తిథులనిన్ని చవితి నవమి చతుర్దశులు రిక్త తిథులనిన్ని పంచమి దశమి పూర్ణిమ అమావాశ్య పూర్ణ తిథులనిన్ని తెలిసేది ।

End:

विन्यस्याष्टरसे सेन्दुरुद्रसप्तहतस्य च ।
बाणातुरगनामोभिरेते मूलश्च लक्षणम् ॥

(*m*) **नक्षत्रविवरणम्.**

NAKṢATRAVIVARAṆAM.

Foll. 132*b*—135*b*.

Deals with the good or bad effects caused by the various lunar asterisms.

Complete.

Copied on the same day on which the previous work was copied.

Beginning:

अथातः संप्रवक्ष्यामि नक्षत्राध्यायमुत्तमम् ।
नक्षत्रविवरं सर्वे शुभाशुभनिरूपणम् ॥
क्रमोद्देशे दस्रयमवह्निधातृनिशाकराः ।
रुद्रादितिज्ञाहिपितृभगार्यमदिवाकराः ॥

* * *

यात्रोपनयनक्षौरवस्त्रसीमन्तभूषणम् ।
प्रतिष्ठाश्वादिविद्यास्त्रकृषिकर्माश्वभे शुभम् ॥

End:

गुणाधिकः स्वल्पदोषः सकलो मङ्गलप्रदः ।
दोषाणामपवादत्वं सुनिश्चित्य शुभं वदेत् ॥

Colophon:

नक्षत्रविवरणं समाप्तम् ॥

(n) रोगनिर्णयः—आन्ध्रटीकासहितः.

ROGANIRṆAYAḤ: WITH TELUGU MEANING.

Foll. 136a—137a.

States how long any disease will continue when it attacks a person specially under the influence of certain asterisms.

Complete.

Copied on the same day as the previous work was copied.

Beginning:

आरुद्रादिमृगान्तं च मध्ये मूलप्रतिष्ठितम् ।
चन्द्रार्कनामनक्षत्रमेव रेखा यथा भवेत् ।
तस्मिन् काले भवेन्मृत्युरन्यरेखा शुभावहा ।
उरगशतभिषार्द्रा स्वाातमूलत्रिपूर्वे
भरणिपितृविशाखाभानुभौमार्कजानाम् ।
प्रतिपनवचतुर्थीषष्ठिभिर्द्वादशी वा
हरिहरविधिरेको रोगिणां कालमृत्युः ॥

नक्षत्रदिनप्रमाणम् —

कृत्तिका नवरात्रं तु त्रीणि रात्रं तु रोहिणी ।
मृगशिरा पञ्चरात्रं तु आर्द्रायां पञ्चविंशतिः ॥

End:

पर्वतेषु र (त्व)नावृष्टिः सुवृष्टिः कक्षक्रोडयोः ।
कूलेषु चित्रवृष्टिः स्यात् अतिवृष्टिः समुद्रगाः ॥

టీ.—కృత్తిక నక్షత్రంమొదలు సూర్యుడున్న నక్షత్రపర్యన్తం గణనంచేసి
౨ పాలు శేషం . . . .
అతి వృష్టిన్ని అని తెలిచేది ॥

Colophon:

रोगनिर्णयः समाप्तः ॥

Fol. 137b contains रेखाविन्यास.

(o) आर्यभटतन्त्रगणितम्—आन्ध्रटीकासहितम्.

ĀRYABHAṬATANTRAGAṆITAM : WITH TELUGU MEANING.

Foll. 138a—149b.

An astronomical work explaining in stanzas the Kālakriyā chapter of Āryabhaṭīya : by Kodaṇḍarāma of Kōṭikalapūḍi family.

Copied on Tuesday, the 5th of the dark fortnight of the Nija-Bhādrapada.

Complete.

Beginning :

हंसं वाहमलं झषं क्षितकिटिं कूर्मं नृसिंहं वटुं
रामं पृश्निसुतं बलं रघुपतिं बुद्धं कवीनां मुखम् ।
वैकुण्ठं वसुदेवसूनुमृषभं सूर्येन्दुवक्त्रास्फु(कोशनो)·
जीवज्ञार्कितमोध्वजान् शिवमहं वाणीं गणेशं भजे ॥

केशवमृडप्रजापतिमुखाण्डपालांश्च भगवतीं नत्वा ।
आर्यभटतन्त्रटीकां करोमि टीकां क्रियापदस्य मुदा ॥

టీ.—హంసమితి సర్వేశ్వరుని (యొక్క? నవ.గహములకున్నూ గ్రంథా-
రంభమందు నమస్కారము చేయడముఉనది).

जम्भाद्विड्विनिपातसंभवरवैर्निष्ठस्फुरज्झरी-
झांकरैर्भवदर्शनोद्यदुदधिध्वानैर्मृगेन्द्रस्वनैः ।
ब्रह्माण्डप्रसनोत्थिताचलधनुर्मञ्जीरघोषैः समा
वाणीहार्यभटस्य सा विजयतां विद्वत्सभामध्यमे ॥

. ఈ గ్రంథకర్తయైన ఆర్యభటాచార్యుల వాక్కుల యొక్క జయస్తి యిందు
చెప్పడమయినది.

श्रीमत्कोटिकि(क)लपूडिवंशजनितः कोदण्डरामाह्वयो
ज्योतिःशास्त्रविदुत्तमः कविवरो वेदान्तविद्याचणः ।

कृत्वा पूर्वमजार्कसोमगिरिजान् सिद्धान्ततुल्यान् बहून्
ग्रन्थानार्यभटीयसाम्यमधुना तन्त्रं करिष्ये पदैः ॥

ఈ గ్రంథకర్తయైన కొటికలపూడి కోదండరామయ్య అనే వారిపూర్వుని యొక్క చర్య యీ శ్లోకంలో వ్రాయబడ్డది.

कर्णाटदेशव्यवहारयोग्यं दृग्गोचराभ्यां(हे)विषयान्तरेषु ।
अन्यायशून्यं दशगीतिकोक्तं वक्ष्येऽहमद्यार्यभटीयतन्त्रम् ॥

కర్ణాటదేశమందు ఈ గ్రంథము వ్యవహారముకొఱకు ఇతర దేశములందు దృగ్గోచరముకొఱకున్నూ ప్రశస్తమయివుంటుంది.

शाकस्य द्वियुताङ्गशैलमुनिभू (१७७६)खाङ्गाग्नि(३६०)निघ्नो दिनैः
युक्तः स्वस्य नवाक्षिबाण(५२९)सहितस्याङ्गाद्रिवेधो(९७६)फलात् ।
त्रिंश(३०)घ्नात् सहितः पृथुनृप(१६)युतो रुद्रा(११)हतो वह्निख-
क्ष्माभृद्भक्त(७०३)फलोनितो दिनगणः स्यात्सौम्यवारादितः ॥

End :

कोदण्डरामविबुधेन गुणाब्धि(४३)पद्यैः
कालक्रिया द्य(वि)रचितार्यभटीयतन्त्रे ।
कर्मार्हपादमथ कातुकपादमस्मिन्
आनन्दपादमपि कामगवीव भाति ॥

టి.—ఆర్యభటసిద్ధాంతంలో కాలక్రియాపాదం తంత్రగణితంగా ౪౩ శ్లోకాలచేతనున్నూ తెలుగు వ్యాఖ్యానంచేతనున్నూ రవ్యాదిమధ్య గ్రహస్ఫుట గ్రహపథకములుచేతనున్నూ కొటికలపూడి కోదండరామయ్య అనే సిద్ధాంతవేత్త యీగ్రంథం చేసినాడు. ఈ గ్రంథసంబంధమైన పత్రకములు యీమీద వ్రాస్తున్నాను.

Colophon :

इति श्रीरामचन्द्रप्रसादलब्धकविताभिधेयश्रीमत्कोडिकि(टिक)लपूडि-कोदण्डनामधेयविरचितायामार्यभटीयतन्त्र(व्याख्यायां) कालक्रियापादः प्रथमः ॥

Foll. 150*a*—157*b* contain astronomical tables connected with this work.

The remaining leaves are left blank.

R. No. **372.**

Palm-leaf. $9\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 172. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1911-12 from C. Viśvanātha Śāstri of Vizianagaram.

The first 12 foll. are left blank.

(*a*) **चण्डीसंध्या.**

CAṆḌĪSANDHYĀ.

Foll. 13*a*—14*b*.

Deals with the morning, the noon and the evening prayers as using the Śākta Mantras. It is intended to be observed by the followers of Śāktism.

Complete.

Beginning:

तत्रादौ वैदिकीं निर्वृत्य तान्त्रिकीं समाचरेत् ।

मूलेन त्रिराचम्य मूलेन प्राणायामत्रयं कृत्वा श्रीचण्डिकापरमेश्वरीमुद्दिश्य श्रीचण्डिकापरमेश्वरीप्रीत्यर्थं सप्तशतीजपाङ्गचण्डीसन्ध्यामुपासिष्ये इति संकल्प्य अङ्कुशमुद्रया सूर्यमण्डलादुदकमाकृष्य स्वपुरस्थिते जले आवाह्य आवाहनादिपञ्चमुद्राः प्रदर्श्य स्वपुरःस्थितजलं धेनुमुद्रया अमृतीकृत्य ओं ओं अमृतमालिनी स्वाहा इत्यनेन मूलेन चाष्टवारमभिमन्त्र्य ।

End:

हिनस्ति दैत्यतेजांसि स्वनेनापूर्यते जगत् ।
सा घण्टा पातु नो देवी पापेभ्यो नः शुभावहा ॥
असुरासृग्वसापङ्कचर्चितस्तेऽखिलोज्ज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥

इत्युपस्थानं कुर्यात् ॥

(*b*) देवीसूक्तमालामन्त्रः.

DĒVĪSŪKTAMĀLĀMANTRAḤ.

Foll. 15*a*—16*b*.

This Mantra is in praise of the goddess Dēvī, and its repetition is held to enable one to bring everything under one's control.

Complete, as found in the Mārkaṇḍēyapurāṇa.

Beginning:

अस्य श्रीदेवीसूक्तमालामन्त्रस्य मार्कण्डेयो मेधा ऋषिः, गायत्र्यादीनी छन्दांसि, श्रीचण्डिका परमेश्वरी देवता ।

* * * *

ओं नमो भगवते(ति)सर्वे हर हर ह्रैं ह्रैं सौः जय जय महालक्ष्मीः जगदादिनि जे जे सुरासुरत्रिभुवननिलये ।

End:

सर्वत्र त्रिभुवनं मम वशमानय मा(आ)नय स्वाहा ।

नमोऽस्तु ते नमोऽस्तु ते स्वाहा ॥

Colophon:

इति श्रीमार्कण्डेयपुराणे मन्वन्तरे देवीसूक्ते मन्त्ररूपकं संपूर्णम् ॥

(c) चण्डीध्वजमहामन्त्रः.

CAṆḌĪDHVAJAMAHĀMANTRAḤ.

Foll. 17a—18b.

Similar to the above. Caṇḍī is another name for Dēvī.

Complete.

Beginning:

अस्य श्रीचण्डीध्वजमहामन्त्रस्य मार्कण्डेय ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता ।

नमस्तेऽस्तु महादेवि परब्रह्मस्वरूपिणि ।
रक्ष मां शरणे देवि धनधान्यप्रदायिनि ॥
राज्यं देहि धनं देहि साम्राज्यं देहि सर्वदा ।

End:

चण्डीध्वजमिदं स्तोत्रं सर्वकामफलप्रदम् ।
राजश्रीसर्वजन्तूनां वशीकरणसाधके ॥

Colophon:

इति श्रीमार्कण्ड(ण्डेय)पुराणे देवीमाहात्म्ये ब्रह्मप्रोक्ते राजानुसन्धाने चण्डीध्वजं संपूर्णम् ॥

(*d*) **कालीसूक्तम्.**

KĀLĪSŪKTAM.

Foll. 19*a*—20*b*.

Similar to the above.

Complete.

Beginning:

श्रीदेव्युवाच—

. . . ते मनोदेव कुलधर्मसुपूजने ।
दृढं भवतु सूक्तस्य प्रसादात्तु परंतप ॥
सर्वसिद्धिप्रदं चास्तु परमानन्ददायकम् ।
विना सूक्तं पठेद्यस्तु स्तोत्रं सप्तशतीं तथा ॥

* * * *

श्रीमहादेवः—

शिवाममर्त्यां विविधप्रभावां कालीं कलां विश्वजनैकवन्द्याम् ।
कपालखट्वाङ्गधरां सुमुण्डमालाविभूष्यां मृगचर्मभूषाम् ॥

End:

इति वाचं समाकर्ण्य ब्रह्मविष्णुशिवोदितम् ।
कुर्वीत स्तोत्रमनिशं ज्ञात्वैव च नृपोत्तम ॥

Colophon:

इति कालीसूक्तं समाप्तम् ॥

(*e*) **लक्ष्मीसूक्तम्.**

LAKṢMĪSŪKTAM.

Foll. 21*a*—23*b*.

Similar to the above. Lakṣmī is here considered to be no other than Dēvī.

Complete.

Beginning :

राजोवाच—

मुने कथय सर्वज्ञ भयं किंचिदनुत्तमम् ।
तत्त्वमेतस्य सर्वस्य येन सिद्धिरवाप्स्यते ॥

ऋषिरुवाच—

भूयः शृणु महाभाग देवीमाहात्म्यमुत्तमम् ।

* * * *

श्रीहरिरुवाच—

बद्धाञ्जलिः समाधाय हरिः प्रोवाच विश्वधु(सृट्) ।
महालक्ष्म्याश्च विख्यातिममेयामिष्टदायिनीम् ॥
वरां वरेशां जगदादिभूतां वरां वरेण्यां वरदां वरिष्ठाम् ।
वरेश्वरीं त्वां बहुवाक्यगीतां त्वां सर्वयोनिं शरणं प्रपद्ये ॥

End :

लभते परमं व्याधिं मम कोपविघूर्णितः ।
लक्ष्मीसूक्तं विना जाप्यं स्तोत्रं सप्तशती न हि ॥

Colophon :

इति लक्ष्मीसूक्तं संपूर्णम् ॥

(*f*) सरस्वतीसूक्तम्.

SARASVATĪSŪKTAM.

Foll. 24*a*—26*b*.

This Mantra is in praise of the goddess Sarasvatī and its repetition is held to be efficacious in bringing about the accomplishment of one's desires

Complete.

Beginning:

ऋषिरुवाच—

एवमुक्त्वा वचो लक्ष्मीस्तूष्णींभूय गता नृप ।
नमस्ते देवदेवेश हंसारूढ पितामह ॥

देवा ऊचुः—

प्रपञ्चस्य हितार्थाय वाणीसूक्तं वद प्रभो ।

ब्रह्मोवाच—

बद्धाञ्जलिः समाधाय ब्रह्मा प्रोवाच विश्वसृट् ॥
सरस्वत्याः स्तुतिं श्रेष्ठामभीष्टार्थप्रदायिनीम् ।
अजां पुराणीं महिषीं सनातनां चतुर्भुजां पुस्तकमक्षधारिणीम् ।
वराभयाभ्यामतिशोभिहस्तां नमामि तां जात्यजरादिनाशिनीम् ॥

End:

त्वमेवमादौ वसुधामयी च त्वं तत्त्वभूता जगतां त्रयाणाम् ।
ते त्वां स्तुवन्ति प्रकटं मुहुर्मुहुस्त्वां सर्वयोनिं शरणं प्रपद्ये ॥

* * * *

त्वत्सूक्तैश्चापि देवेशि तेजो वीर्यं विधीयताम् ।
येन कार्याणि सिध्यन्ति साधकानां महात्मनाम् ॥

(*g*) चिन्तामणिमहाविद्येश्वरीमन्त्रः.

CINTĀMAṆIMAHĀVIDYEŚVARĪMANTRAḤ.

Fol. 27.

This Mantra is also addressed to Śakti, and its repetition is held to be efficacious in destroying one's sins and in causing the accomplishment of one's desires.

Complete.

Beginning:

अस्य श्रीचिन्तामणिमहाविद्येश्वरीमहामन्त्रस्य अगस्त्यभगवानृषिः, महाविराट् छन्दः, श्रीमहाविद्येश्वरी चिन्तामणिर्देवता, मं बीजम्, स्वाहा शक्तिः ।

End :

चतुःषष्टि(:)समाख्याता योगिन्यो वरसिद्धिदाः ।
नित्यं स्मरणमात्रेण सर्वपापक्षयो भवेत् ॥

Fol. 28 contains a Vedic Sūkta.

(*h*) देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Foll. 29*a*—101*b*.

Same work as the one described under No. 2444 of the D.C.S. MSS., Vol. IV, Part II.

Contains —

29*a*	माहात्म्यमन्त्र.	46*a*	दल.
31*a*	न्यास.	49*a*	ध्यान.
39*a*	आवाहन.	50*a*	सप्तशती.
40*a*	स्तोत्र.	51*a*	प्रथममध्यमोत्तमचरित्र.
41*a*	अर्गल.	53*a*	do.
42*b*	कीलक.	56*a*	माहात्म्य, Adhyāyas 1—16.
44*a*	हृदय.		

(*i*) चण्ड्युत्तरकवचः.

CAṆḌYUTTARAKAVACAḤ.

Foll. 102*a*—106*a*.

This Kavacamantra is addressed to Caṇḍikā or Dēvī and is intended to propitiate Her. It is to be repeated after a formal reading of the Dēvīmāhātmya.

Complete.

Beginning :

अस्य श्रीचण्डीमहामन्त्रोत्तरकवचस्य अगस्त्यभगवानृषिः, आदिविराट् छन्दः, महाविद्येश्वरी महाचण्डिका देवता, ऐं बीजम्, ह्रीं शक्तिः, क्लीं कीलकम्, श्रीमहाचण्डिकादेवताप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

वाराही नासिकां चैव कौमारी नेत्रयुग्मकम् ।
दन्तद्वयं नारसिंही जिह्वाग्रं चण्डिकाम्बिका ॥

End:

अचलां श्रियमाप्नोति सर्वव्याधिनिवारणम् ।
अन्ते स्वर्गं च मोक्षं च सत्यमेव न संशयः ॥

Colophon:

इति श्रीदेवीपुराणे चण्ड्युत्तरकवचं संपूर्णम् ॥

Foll. 106*b*—113*b* are left blank.

(*j*) भवानीपुष्पाञ्जलिस्तोत्रम्.
BHAVĀNĪPUṢPĀÑJALISTOTRAM.

Foll. 114*a*—116*b*.

A short hymn full of rhyming syllables in praise of **Pārvatī** who is here addressed under various significant names: by Śaṅkarācārya. This hymn is intended to be repeated when flower-offerings are made in the course of a formal worship.

Complete.

Beginning:

अयि गिरिनन्दिनि नन्दितमोदिनि विश्वविनोदिनि नन्दिनुते ।
गिरिवरविन्ध्यशिरोनिधिवासिनि विष्णुविलासिनि जिष्णुनुते ॥
भगवति हे शितिकण्ठकुटुम्बिनि भूतिकृते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि पाहि शिवे ॥

End:

स्तुतिमितः स्तिमितः सुसमाधिना नियमतो यमतोऽनुदिनं पठेत् ।
परमया रमया च निषेव्यते परिजनोऽरिजनोऽनुदिनं भवेत् ॥

Colophon:

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमत्परमहंसपरिव्राजकाचार्य-
श्रीमच्छङ्कराचार्यविरचितं भवानीपुष्पाञ्जलिस्तोत्रं संपूर्णम् ॥

(*k*) मन्त्रसंस्कारः.

MANTRASAṀSKĀRAḤ.

Fol. 117.

Deals with the necessary preliminary ceremonies to be performed so as to make the repetition of the Mantras contained in the Dēvīmāhātmya efficacious.

Complete, but wants beginning.

Beginning :

श्लोकानामष्टसप्तत्या चतुर्भिरधिकं शतम् ।
एकोनसप्ततिः सर्वेऽध्यायोन्म(ये म)न्त्रा द्वितीयके ॥
(त्रय)श्चत्वारिंशदेवं सर्वे मन्त्रास्तृतीयके ।

End :

अभिषेकोऽथ विमलीकरणाप्लावने पुनः ।
तर्पणं दीपनं गुप्तिरित्युक्ताः कुलनायिके ॥
शाणोल्लीढानि शस्त्राणि यथातिनिशितापि(नि)हि ।
मन्त्राश्च स्फूर्तिमायान्ति संस्कारैर्दशभिस्तथा ॥

(*l*) अष्टादशपीठाः.

AṢṬĀDAŚAPĪṬHĀḤ.

Foll. 117*b*—118*a*. Fol. 118*b* is left blank.

Same work as the one described under No. 5559 of the D.C.S. MSS., Vol. XII.

Complete.

(*m*) कात्यायनीतन्त्रम्.

KĀTYĀYANĪTANTRAM.

Foll. 119*a*—124*b*.

Same work as the one described under No. 5573 of the D.C.S. MSS., Vol. XII.

Contains Paṭalas 20 to 23.

The remaining leaves are left blank.

R. No. **373.**

Palm-leaf. $14\frac{3}{8} \times 1\frac{1}{8}$ inches. Foll. 136. Lines, 5 in a page. Telugu. Injured.

Purchased in 1911-12 from the Sarasvatī-Bhāṇḍāgāra of Triplicane.

(*a*) अष्टाङ्गहृदयम्.

ASṬĀṄGAHṚDAYAM.

Foll. 1*a*—44*a*. Fol. 44*b* is left blank.

A well-known work on medicine and surgery: by **Vāgbhaṭa**. The work has been printed in Bombay.

Nidānasthāna, complete.

Beginning:

अथातः सर्वरोगनिदानं व्याख्यास्यामः । इति ह स्माहुरात्रेयादयो महर्षयः ।

रोगाः पाप्मा ज्वरो व्याधिर्विकारो दुःखमामयः ।
यक्ष्मातङ्कगदाबाधशब्दाः पर्यायवाचिनः ॥

End:

विद्रधिर्प्लीहहृद्रोगगुल्माग्निसदनादयः ।
भवन्त्युपद्रवास्तेषामावृतानामुपक्षयात् ॥

Colophon:

इति निदाने षोडशोऽध्यायः ॥

(*b*) चिकित्सातिलकम्.

CIKITSĀTILAKAM.

Foll. 45*a*—136*b*.

Similar to the above By Śrīnivāsa Paṇḍita, son of Raghunathārya and grandson of Aijanātha of Kauśikagōtra and Ārvēla community of Telugu Brahmins.

Contains Sūtrasthāna complete, and four lines in Śārīrasthāna.

Sūtrasthāna contains the following 40 Adhyāyas:—

१ वैद्याधिकारः.	४. अग्निभागः.
२. दोषज्ञानम्.	५. प्रकृतिलक्षणम्.
३. दोषभेदः.	६. धातुविज्ञानम्.

७. रसभेदः.
८. द्रव्यविज्ञानम्.
९. रोगनिदानम्.
१०. द्विविधोपक्रमणीयम्.
११. दोषोपक्रमणीयम्.
१२. दिनचर्या.
१३. ऋतुचर्या.
१४. रोगानुत्पादनीयम्.
१५. द्रवद्रव्यम्.
१६. अन्नविज्ञानम्.
१७. अन्नरक्षणीयम्.
१८. मात्राभस्मनिरूपणम्.
१९. शुद्ध्यादिगुणः.
२०. स्नेहविधिः.
२१. सेकविधिः.
२२. वमनविरेकादि.
२३. वमनकल्पः.
२४. विरेककल्पः.
२५. वमनविरेचनव्यापत्सिद्धिः.
२६. वस्तिविधिः.
२७. वस्तिकल्पः.
२८. वस्तिव्यापत्सिद्धिः.
२९. भेषजकल्पः.
३०. नस्यविधिः.
३१. धूमविधिः.
३२. गण्डूषविधिः.
३३. अञ्जनविधिः.
३४. तर्पणविधिः.
३५. यन्त्रविधिः.
३६. शस्त्रविधिः.
३७. सिराविधिः.
३८. शल्याहरणविधिः.
३९. शस्त्रविधिः.
४०. क्षाराग्निकर्मविधिः.

Beginning :

विश्वं विष्णुर्यस्ससर्ज यस्तु धन्वन्तरिः स्वयम् ।
दत्तात्रेयात्मको यस्तु सुश्रुताद्यग्निवेशकान् ॥
सर्वलोकोपकारार्थमायुर्वेदमजिग्रहत् ।
पण्डितश्रीनिवासीयचिकित्सातिलके तु सः ॥

नित्यं संनिहितो भूत्वा कल्याणानि करोतु वः ।
दत्तात्रेयमहं नत्वा रघुनाथार्यनन्दनः ॥

पण्डितश्रीनिवासाख्यः श्रीमत्कौशिक(गो)त्रजः ।
पेजनायार्यसत्पौत्रः चार्वीथ(वें)लकुलसं(भवः) ॥

. . . . पद्दनार्येभ्यश्चायुर्वेदकलानिधिम् ।
चिकित्सातिलकं वक्ष्ये पूर्वोक्ताखिलसंग्रहम् ॥
लक्ष्यलक्षणसंयुक्तं स्थानपञ्चल(क)संयुतम् ।
कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृतम् ॥

* * * *

Colophon:

इति श्रीनिवासपण्डितविरचितचिकित्सातिलके सूत्रस्थान वैद्याधिकारो नाम प्रथमोऽध्यायः ॥

End:

घटपाकश्च शस्त्रे तु व्रणाचारक्षतव्रणान् ।
क्षारक्षाराग्निकर्माख्या(न्) एवं सूत्रोदितान् क्रमात् ॥
पण्डितश्रीनिवासीयचिकित्सातिलकाह्वये ।
कुरुध्वमस्मिन् विश्वासं विवादं न कदाचन ॥
पुनरुक्ते विचारं च मा कुरुध्वं विशेषतः ।
नानाशास्त्रानुसारेण नानामतविभेदतः ॥
चि(कित्सातिल)के प्रोक्ते तस्मात्सर्वं प्रशस्यते ।
दत्तात्रेयप्रसादात्तु सर्वाभीष्टफलप्रदात् ॥
श्रीमदैजश्रीनिवासपण्डितीयेऽतिकौतुके ।
चिकित्सातिलके सूत्रस्थानमद्य समाप्यते ॥
अत्रार्थाः सूचिताः सूक्ष्माः प्रतन्वन्ति हि सर्वतः ॥

Colophon:

इति श्रीमदार्वेलकुलमण्डितपण्डितश्रीनिवासीये (चिकित्सातिल)के सूत्रस्थानं समाप्तम् ॥

अथातः संप्रवक्ष्यामि शारीरं स्थानमुत्तमम् ।
श्रीमदैजश्रीनिवासपण्डितीयेऽतिकीर्तिते ॥

चिकित्सातिलके त्वथ दत्तात्रेयस्य शासनात् ।
अथातः संभोगसाधनं व्याख्यास्यामः ।

R. No. 374.

Palm-leaf. $14\frac{3}{4} \times 1\frac{5}{8}$ inches. Foll. 161. Lines, 6 in a page. Telugu. Good.

Purchased in 1911-12 from C. Viśvanātha Śāstrigal of Vizianagaram.

(*a*) जातकपद्धतिः.

JĀTAKAPADDHATIḤ.

Foll. 1*a*—14*b*.

An astrological work dealing specially with horoscopy and consisting of eight Adhyāyas as given below :—

१. भावाध्यायः.	५. आयुर्दायाध्यायः.
२. दृष्टिफलाध्यायः.	६. रिष्टभङ्गरिष्टाध्यायः.
३. बलाध्यायः.	७. अन्तर्दशाध्यायः.
४. इष्टकष्टाध्यायः.	८. प्रकीर्णकाध्यायः.

The author of the work is Śrīpati, and it is stated to contain 136 stanzas of 199 Granthas in extent.

Complete.

Beginning:

नत्वा तां गुरुदेवतां त्रिसमयज्ञानोद्गतेः कारणं
तत्पादाम्बुरुहप्रसादविकसद्बोधो बुधश्श्रीपतिः ।
शिष्यप्रार्थनया विचार्य सकलान् होरागमार्थान् मुहुः
वक्ष्ये जातककर्मपद्धतिमहं होराविदां प्रीतये ॥
ज्ञेयोऽत्र प्रथमं हि जन्मसमयश्छायादियन्त्रैः स्फुटं
तत्कालप्रभवा विलग्नसहिताः कार्यास्ततश्च ग्रहाः ।
सिद्धान्तोक्तपरिस्फुटोपकरणैस्ते चासकृत्कर्मणा
भावाः खेटदृशो बलानि च ततस्तेषां विचिन्त्यानि षट् ॥

End:

कण्टकादिपरिभाषयानया सांप्रतं सकलभावजातया ।
जातकादिफलमप्यपश्यतां प्रत्ययो भवति धीमतामिह ॥
इति जातककर्मपद्धतिं गुरुपादाब्जगुरुप्रसादतः ।
इह शिष्यसुखावबोधिनीं कृतवान् श्रीपतिरग्रणीः सताम् ॥
अध्यायानामष्टके वृत्तसंख्या संजाता स्यात् षट्त्रिचन्द्रप्रमाणात् ।
प्रोक्तानुष्टुप्छन्दसा ग्रन्थसंख्या श्लोकैनैकेनोनया हि द्विशत्या ॥

Colophon:

इति श्रीपत्याचार्यविरचितायां जातकपद्धत्यां प्रकीर्णाध्यायोऽष्टमः ॥
सूर्यः पितामहो व्यासः वसिष्ठोऽत्रिः पराशरः ।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ॥
रोमशः पौलशश्चैव च्यवनो यवनो भृगुः ।
शौनकोऽष्टादश ह्येते ज्योतिःशास्त्रप्रवर्तकाः ॥

(b) अन्तर्दशादिनिर्णयः—आन्ध्रटीकासहितः.

ANTARDAŚĀDINIRṆAYAḤ: WITH TELUGU MEANING.

Foll. 14*b*—47*a*. Fol. 47*b* is left blank.

Similar to the above. Foll. 14*b*—24*b* contain Sanskrit and Telugu, and foll. 25*a* – 47*a* Telugu only.

Incomplete.

Beginning:

अन्तर्दशाक्रममाह—
स्वदशां त्रिगुणीकृत्य स्वदशेन हतं पुनः ।
स्वामिना विभजेल्लब्धं मासाः शेषा दिनानि च ॥

अन्तर्दश दिनान्येव स्वदशाभिहृतं पुनः ।
द्विषष्टिरासं दिवसाः शेषाश्चार्धघटी भवेत् ॥

*   *   *   *

అంతర్దశాదినిర్ణయానకు.

नाक्षत्रिकदशाब्दस्य त्रिदिनं भागमुच्यते ।
मासानां च चतुष्कस्य वासरस्यैकमाहरेत् ॥
दिनद्वयस्य नाड्येका द्वयोर्नाड्योर्विनाडिका ।
एवं खेटदशाब्दास्तु तज्जन्मानैर्हता यदि ॥
भवेदन्तर्दशामानमन्तरन्तर्दशा भवेत् ॥

End:

ग्रहचेष्टाफलं ज्ञात्वा दशासु च फलं वदेत् ।
राश्या च फलसंयुक्तं ननु वेदविभाजितम् ॥
तच्छेषं समयं प्रोक्तं ग्रहाणां फलमादिशेत् ।

*   *   *   *

ఏ యే ఫలములు సంభవించగలవో అవి అన్నిన్ని ఆయా దశల యందు కర్మా-
లానుసారంగా యోజించ తగ్గవి అని యెఱిగేది ॥

(*c*) जातकचन्द्रिका.

JĀTAKACANDRIKĀ.

Foll. 48*a*—53*a*. Fol. 53*b* is left blank.
Similar to the above.
Pūrvabhāga, complete ; Uttarabhāga, incomplete.

Beginning:

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरमहं किंचिद्वीणाधरमुपास्महे ॥
फलानि नक्षत्रदशाप्रकारेण विवृण्महे ।
वयं पाराशरीं होरामनुसृ(त्य) यथामति ॥

बुधैर्भावादयः सर्वे ज्ञेयाः सामान्यशास्त्रतः ।
एतच्छास्त्रानुसारेण संज्ञां ब्रूमो विशेषतः ॥
पश्यन्ति सप्तमान् सर्वे शनिजीवकुजाः पुनः ।
विशेषतश्च त्रिदशत्रिकोणचतुरष्टगान् ॥

End :

दीप्तः स्वस्थो मुदितः शान्तोऽशक्तः प्रपीड्यते(चा)र्थी
विकलः खलता भीम एवं ज्ञेया दशावस्थाः ॥

(*d*) **अष्टकवर्गः—आन्ध्रटीकासहितः.**

ASṬAKAVARGAḤ : WITH TELUGU MEANING.

Foll. 54*a*—66*a*. Fol. 66*b* is left blank.

Similar to the work described under R. No. 371(*a*) *ante*.

Complete.

Beginning :

जगतां जननी करुणानिलयं भजतां भवभङ्गकरी निलयम् ।
करसंभृतसद्गत(द)या सदया रिपुनाशकरी वरदा भवती ॥
तिर्यग्विश्वोर्ध्वरेखं गिरिगिरिशपथं न्यस्तचक्रं तदूर्ध्वे
मेषाद्या राशयः स्युर्ग्रहदो(गण)सहितं शिष्ट[मष्ट]सृष्टस्य पद्मम् ॥
तस्याधः सौरिमुख्यान् खचरपतियुतान् जन्मलग्नं लिखेच्च
न्यस्याधन्वेयचक्रे स्वपदसहितभार्चांशके बिन्दुरेखाः ॥

టీక.—

నిడుపు పదమూడు రేఖలువ్రాసి అడ్డంగా పది ౧౦ రేఖలువ్రాసిన్తే ౧౩ యిళ్ల చక్రం అవును. మొదటి ౧౨ యిళ్లలోను మేషాది ద్వాదశ రాసులు వ్రాసేది.

End :

लग्नेधु(न्दु)रविणां मध्ये फलाधिकदशादिमः ।
ततः केन्द्रस्थितानां च ग्रहाणां च दशाः स्मृताः ॥

*   *   *   *

శుభగ్రహమయ్ను పాపగ్రహమయ్ను సర్వగ్రహాలలోను బలహీన గ్రహందశ ఏ దానిదశ అత్యంతదశ॥

Colophon :

इति श्रीमुनिभगवान् (वत्)शक्तिपराशरच्यवनमययवनमन्दाचार्यसिद्ध-
सेनजीवकर्मकृतकीर्तिबादरायणविष्णुगुप्तदेवराचार्यनीलकण्ठाचार्यदामोदरा -
चार्यशंकराचार्यभट्टाचार्यक्रमकल्याणवर्षादिजातकग्रन्थनिर्माणनिपुणान्नमस्कृ -
त्य होरासारसम्प्रदायकजातकजातकोदयदैवज्ञदर्पणकालचक्रजातकस्वरजात-
कद्युतिशायिनी(स्थः) अष्टकवर्गस्समाप्ता(प्तः) ॥

(*e*) आरूढजातकम्.

ĀRŪḌHAJĀTAKAM.

Foll. 67*a*—87*a* Fol. 87*b* is left blank.

On the method of constructing horoscopes from the nature of the reply given by a person who is questioned with that object in view. The work is attributed to Gautama.

Breaks off in the eighth Adhyāya. The eight Adhyāyas are—

१. प्रपूज्याध्यायः.
२. . . . .
३. सन्धानाध्यायः.
४. राजयोगाध्यायः.
५. विशेषराजयोगाध्यायः.
६. . . . .
७. भाग्ययोगाध्यायः.
८. विशेषभाग्ययोगाध्यायः.

Beginning :

श्रीवाणीं शिरसा प्रणम्य विलसन्मद्य . . . पिनीं
होराशास्त्रपयोधिनि (निधि) प्रमथनात्सारं समाकर्षताम् ।
हृद्यं चाष्टपदैः प्रयुक्तनियमं ह्यारूढशास्त्रं स्फुटं
वक्ष्ये भूपतियोग . . . मानन्दसंदायिनीम् ॥
यः शंकरार्चनविधौ मनसापि रक्षा(:)
यो देवता (स्व) पितृमातृबुधेषु रक्षः ।
यो मानवस्य कुलवृत्तिमुपैति तेषां
भूपालकृत्यमनिशं भुवि मानवानाम् ॥

विश्वेदेवार्चनविधौ श्रद्धाभक्तिसमन्वितः ।
यो नरः पृथिवीपालः श्रीशुकेन सुभाषितम् ॥
कूश्माण्डगोधात्रिवृषाश्वलिङ्गं तिलाक्षतान् तैलगुडाज्यलोहान् ।
धात्रीफलं कांस्यसुवर्णराजतान् फलानि पुष्पाणि भवाय दीयताम् ॥

* * * *

Colophon :

इति गौतमविरचितायां प्रपूज्याध्यायः प्रथमः ॥

End :

नृपेऽथवा कोशपदे सुरेशः [पदेसुरेज्यो]पदेश्वरे चोपपतिर्विलग्ने ।
प्रभावपेनापि युतेक्षिते वा स वाहनान्दोलिकराजतुल्यः ॥

Colophon :

इति गौतमसंहितायां जात(क)कर्मपद्धतौ धनवाहनभाग्ययोगाध्यायः सप्तमः ॥

विशेषधनयोगमाह—

आरूढलाभगे सौम्ये तद्धने भृगुनन्दने ।
(स)तत्समे गुरुयुते बहुद्रव्यस्य नायकः ॥

* * * *

मूर्तिप्रतापधनवाहनसीमयानसिंहासनादिमणिसौधविहारविद्या ।
मन्त्रप्र . . . भाग्यबहुप्रकारैः प्रोक्ता भवन्ति . . . ।

(*f*) योगायुर्दायः.

YŌGĀYURDĀYAḤ.

Foll. 88*a*—94*a*. Fol. 94*b* is left blank.

Similar to the work described under R. No. 371(*a*) *ante*.

Complete.

Beginning:

एकः पापोऽष्टमगः शत्रुगृहे पापवीक्षितो वर्षात् ।
मारयति शिशुं जातं सुधारसो येन पी[बि]तोऽपि ॥

End:

भ्रातृस्थानगते जीवे मृत्युस्थानगते(तः) शशी।
निरन्तरं गृहं मध्ये राजा भवति निश्चयः ॥

(*g*) जातकजीवनम्.
JĀTAKAJĪVANAM.

Foll. 95*a*—99*a*.

Similar to the work described under R. No. 374(*a*) *ante*.

Complete.

Beginning:

वन्दे मन्दारमूलस्थं वृन्दारक(निषेवितम्) ।
(कु)न्देन्दुस्फटिकाकारं चन्द्रमौलिं शिवाप्तये ॥
परस्परविरोधार्थज्योतिःशास्त्रार्णवोदरे ।
मज्जतामवलम्बोऽयं वक्ष्ये जातकजीवनम् ॥
चरस्थिर(गता)खेटाः स्थिरादुभयगा ग्रहाः ।
क्रमाद्भवन्ति बलिनो राशयोऽपि तथैव च ॥

End:

चरे स्थिरान् स्थिरे चरान् उभयत्रोभयस्थितान् ।
समीपसंस्थितं त्यक्त्वा पश्यन्ति त्रीन् ग्रहानपि ॥

Colophon:

इति जातकजीवनं समाप्तम् ॥

Foll. 99*b*—107*b* are left blank.

(*h*) द्वादशभावफलानि.
DVĀDAŚABHĀVAPHALĀNI.

Foll 108*a*—118*b*.

On the good or bad effect caused to a person by the position of the various planets in one's horoscope.

Complete.

Beginning:

चन्द्राष्टमं च धरणीसुतसप्तमं च राहुर्नवं च शनिजन्म गुरुस्तृतीये।
शुक्रस्य षष्ठबुधसप्तमकेतुजन्म . . . . ॥

* * * *

पापास्त्रिकोणकेन्द्रे सौम्याः षष्ठाष्टमव्ययगताश्च ।
सूर्योदये प्रसूतः सद्यः प्राणान् त्यजन्ति(ति)जन्तुः ॥

End:

चन्द्रे मेषे वृषे वा कुजशनिसहिताः श्वेतकुष्ठः स रोगी
दैत्येज्यारेन्दुमन्दास्तिमिभवनगताः कर्कटालिस्थिता वा ।
अङ्गे सौख्येन हीनं परमकलुषकृत् रक्तकुष्ठो नरस्य
वागीशो भार्गवो वा यदि रिपुगृहगौ मूर्तिगाः क्रूरखेटी ॥

(*i*) योगिनीजातकम् —आन्ध्रटीकासहितम्.
YŌGINĪJĀTAKAM: WITH TELUGU MEANING.

Foll. 19*a*—120*b*. Fol. 121 contains some stray stanzas on pulse and rain. Fol. 122 is left blank.

Similar to the work described under R. No. 374(*a*) *ante*.

Incomplete.

The MS. is said to have been copied by Sulla Sūryanārāyaṇa on Saturday, the 12th of the dark fortnight of the month of Bhādrapada, in the year Raktākṣi.

Beginning:

योगिनीजातकम्—

चन्द्रनक्ष(त्र)मारभ्य(।) जन्मनक्षत्रं गण्यते ।
चन्द्रादिनवपर्यायां दशायां नवसंख्यया ॥

* * * *

मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा ।
उल्का सिद्धा संकटा च योगिन्योऽष्टौ प्रकीर्तिताः ॥

End:

సంకటాదశకురాశ్యు యాక్రమానను శుభదశలుమంచివి పాపదశలు మంచివికాదు. . . . .

रव्यादितनुपान्तं च शैलबाणाभिभिर्हतम्
ग्रहसंख्या हरेच्चेदं गुलिकादिग्रहाह्वयः ॥

టీకా:—

రవియున్నరాశి మొదలుకొని లగ్నాధిపతి యున్నరాశి పర్యంతం వేసిపెట్టి ఆ సంఖ్య 3 ప్రతులుపెట్టి . . . .

యిందులోల యిందుభుంతు రవి నిశ్చయం ॥

---

(७) भृगुकेरलम् —आन्ध्रटीकासहितम्.

BHRGUKĒRALAM: WITH TELUGU MEANING.

Foll. 123*a*—136*b*. Fol. 137 is left blank.

A work on horoscopy.

Complete.

This manuscript is said to have been copied on Friday, the 5th of the dark fortnight in the month of Phālguna, in the year Hēvilambi.

Beginning:

पादच्छायार्कहतागासानार्के च दिनार्धभाचेन्दोनेन हृतं षष्ठ(६)घ्नं द्विजग्रहाभिष्ठितदृष्टश्चेत् ब्राह्मणवर्गे धनप्रदः। ग्रहेण द्रव्यजानिः आय· भावस्थो बलाधिक इष्टाधिक उच्चमित्रस्वक्षेत्रस्थः ।

End:

चन्द्रलग्नाधिपो यत्र तत्रिकोणमथापि वा ।
तत्ससमत्रिकोणे वा भवेल्लग्नस्य निर्णयः ॥

Colophon:

इति ज्यौतिषप्रकारेण भृगुकेरलं समाप्तम् ॥

* * * *

शुभानां बहुसंबन्धे ते द्रष्टारो विशेषकृत् ।
पितृपो मातृपश्चैव शत्रुदेहाधिपा यदि ॥

चत्वार एकराशिस्थाः परजातो भवेद्ध्रुवम् ।
पितृस्थानाधिपो वापि पितुर्मरणकारकः ॥
पूर्वत्रये मखारौद्रामूलेन्द्राहियमेषु च ।

(*k*) **पृच्छकफलसंक्षेपः.**

PṚCCHAKAPHALASAṀKṢEPAḤ.

Foll. 138*a*—152*b*.

Deals with the method of foretelling quickly in relation to any unknown subject.

Incomplete.

Beginning :

प्रणम्य लोककर्तारं नारायणमजं प्रभुम् ।
वक्ष्यामि पृच्छकफलं संक्षेपेण समुच्यते ॥
शुभग्रहाः सितज्ञेज्याः पापा मन्दारभास्कराः ।
बुधः पापयुतः पापः क्षीणचन्द्रोऽन्यथा शुभः ॥

End :

नष्टद्रव्यप्रश्न(ः)—

राहुर्वा रविसूनुर्वा भानुर्वा भूमिजोऽपि वा ।
लग्नात्रिपञ्चसप्तायं कुर्यान्नष्टधनागमम् ॥

प्रश्नशुभाशुभनिर्णयम्(ः)—

पृच्छकस्य वचः श्रुत्वा गणयेत्तस्य चाक्षरम् ।
स[म]मे(तु)कार्यनाशाय विषमे कार्यसिद्धिदः ॥

(*l*) **ज्यौतिषविषयः.**

JYAUTIṢAVIṢAYAḤ.

Foll. 153*a*—159*b*.

Similar to the work described under R. No. 374(*a*) *ante*.

Incomplete.

Beginning:

ग्रहकारकाः—रविः दिवापित्रात्मसदृश(श)क्तचुत्साहराजदशपर्वतराज·कारको रविः । मातृमनोभोजनपुष्पसुगन्धलवणेक्षुरसगोधूमवर्णनिशामात्रोदकयत्किंचित्काव्यसस्यबहुरजताभोगच्छत्रजीवनजङ्घाकारकश्चन्द्रः ।

End:

रामैरक्षैर्जगद्भिर्नवगजनवभिर्दन्तिरामैश्च दिग्भिः
हत्वा नक्षत्रमानं खगुणहृतफलं वर्षमासादिकं स्यात् ।
तत्रैकं भौमसौम्यध्वजरवितनयानां दशाः स्युः स्फुटाब्दाः
सूर्यादीनां प्रकल्प्याखिलगणकवरैर्जन्मकाले दशैवम् ॥

The remaining foll. are left blank.

R. No. **375**.

Palm-leaf. $14\frac{3}{8} \times 1\frac{1}{2}$ inches. Foll. 252. Lines, 8 in a page. Telugu. Good.

Purchased in 1911-12 from C. Viśvanātha Śāstrigal of Vizianagaram.

The first four leaves are left blank.

(*a*) कुमारसंभवः—सव्याख्यः.

KUMĀRASAṀBHAVAḤ : WITH COMMENTARY.

Foll. 5*a*—39*a*. Foll. 5*a*—10*b* contain the text and 11*a*—39*a* contain the commentary. Fol. 39*b* is left blank.

By Kālidāsa ; the author of the commentary is Mallinātha.

First Sarga, complete.

(*b*) आपस्तम्बश्रौतसूत्रवृत्तिः—सूत्रदीपिका.

ĀPASTAMBAŚRAUTASŪTRAVṚTTIḤ : SŪTRADĪPIKĀ.

Foll. 40*a*—172*b*.

Similar to the work described under No. 1062 of the D.C.S. MSS., Vol. II.

Praśnas one to five, complete.

Beginning:

ज्ञात्वा श्रुतिस्मृती यस्य यस्य यज्ञाः सभाजनाः ।
नमः परस्मै विश्वस्मात् तस्मै श्रीवत्सवक्षसे ॥
आदिमं ब्रह्मणः कोशमध्यक्षं च परापरम् ।
अपास्ताशेषपाप्मानमापस्तम्बमुनिं स्तुमः ॥
अद्यापस्तम्बसूत्रार्थम(स्या)ज्ञानाज्ञा(ज्ज्ञा)नसंशयान् ।
सूत्रदीपिकया वृत्त्या रुद्रदत्तः परास्यति ॥
सन्तु यस्मिन् विविक्तारः संतन्युर्गुणसाक्षिणः ।
रत्नं रत्नमिति ग्राह्यं मूलं किं तस्य गृह्यते ॥

अत्र भगवानापस्तम्बः समस्तलोकहितसाक्षी विध्यर्थवादमन्त्रात्मकवितथ(त)वेदभागव्याकीर्णं विविक्तानेकशाखाव्यासक्तं च विश्वस्य वैतानिकस्य कर्मणो याजुर्वेदिकं प्रयोगं व्याचिख्यासुः तत्र सर्वत्र प्रथमभाविनोऽज्ञा(ग्न्या)धेयस्यापि इष्ट्यपेक्षि[त]त्वात् पूर्वेष्टीनां दर्शपूर्णमासप्रकृतित्वात् समाम्नाये दर्शपूर्णमासमन्त्राणामेव प्राथम्यात् तदेवाग्रे व्याख्यास्यन् अधिकारं दर्शयति—अथातो दर्शपूर्णमासान् व्याख्यास्यामः । अथशब्दोऽयं प्रकरणारम्भे प्रसिद्धः ।

End:

आलेखनः । आलेखनमतप्रवेशनेनैव विकल्पसिद्धावाश्मरथ्यमतप्रदर्शनेन स्वमतसंवादः ख्याप्यते पुनराधेयं प्रत्यादरविशेषार्थमिति द्रष्टव्यम् ॥

Colophon:

अष्टमः पटलः ॥ इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्र[प्र]वृत्तौ सूत्रदीपिकायां पञ्चमः प्रश्नः समाप्तः ॥

The remaining foll. are left blank.

R. No. **376.**

Palm-leaf. $16\frac{3}{4} \times 2\frac{1}{2}$ inches. Foll. 30. Lines, 5 in a page. Telugu. Slightly injured.

Purchased in 1911-12 from C. Viśvanātha Śāstrigal of Vizianagaram.

अष्टादशस्मृतिसारः.

AṢṬĀDAŚASMṚTISĀRAḤ.

A brief summary of the eighteen well-known Smṛtis.

The copying of the work is said to have been completed by Lakṣmīnārāyaṇa on the 5th day of the bright fortnight of the month of Jyēṣṭha in the year Raktākṣi.

Complete.

Beginning:

शौचविधिः—

मूत्रे च दक्षिणे कर्णे पुरीषे वामकर्णके ।
विण्मूत्रेऽपि पुरीषे तु पृष्ठतः कण्ठलम्बनम् ॥
जलपात्रं गृहीत्वैव नोत्सृजेन्मलमूत्रयोः ।
तज्जलं मूत्रतुल्यं स्यादित्याह भगवान् यमः ॥

End:

सिन्धुस्नानं गयाश्राद्धं वपनं शववाहनम् ।
पर्वतारोहणं चैव न कुर्याद्गर्भिणीपतिः ॥

R. No. **377**.

Palm-leaf. $11\frac{3}{8} \times 1\frac{1}{2}$ inches. Foll. 31. Lines, 6 in a page. Telugu. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

(*a*) सन्ध्याकर्मप्रयोगपद्धतिः.

SANDHYĀKARMAPRAYŌGAPADDHATIḤ.

Foll. 1*a*—12*a*. Fol. 12*b* is blank.

Prescribes the manner of performing the morning, noon and evening prayers as observed by the followers of Āśvalāyana.

Complete.

Beginning:

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥

श्रीरामं जानकीजानिं सच्चिदानन्दविग्रहम् ।
जन्माद्यस्य यतः सम्यक् तं नमामि मुहुर्मुहुः ॥

अथ सन्ध्याकर्मप्रयोगपद्धतिर्लिख्यते—

तत्र सन्धिकाले सन्ध्यावन्दनं कर्तव्यम् । तत्रार्धास्तमितसूर्यदर्शन-कालमारभ्य नक्षत्रोदयपर्यन्तं यः कालः स सायंसन्धिकालः ।

End:

मुकुलेन च हस्तेन बाहुमूलमुपस्पृशेत् ।
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ॥

Colophon:

आश्वलायनसन्ध्याकर्मप्रयोगपद्धतिः समाप्ता ॥

(*b*) सन्ध्यामन्त्रभाष्यम्.

SANDHYÂMANTRABHĀṢYAM.

Foll. 13*a*—31*b*.

Same work as the one described under No. 2882 of the D.C S. MSS., Vol. V.

Incomplete.

R. No. **378.**

Palm-leaf. 15¼ × 1½ inches. Foll. 14. Lines, 5 in page. Telugu. Slightly injured.

Purchased in 1911–12 from C. Viśvanātha Śāstrigal of Vizianagaram.

(*a*) आहिताग्निसंस्कारः.

ĀHITĀGNISAṀSKĀRAḤ.

Foll. 1*a*—12*b*.

Treats of the rites to be observed on the death of persons who have been duly maintaining the sacred fire in their houses.

Incomplete.

Beginning :

अथातः पैतृमेधिकं दहनम्--

आहिताग्नेर्मरणसंशये प्राचीनावीती दहनदेशं जोषयते दक्षिणा-प्रत्यक्प्रवणमनिरिणमसुषिरमभङ्गुरम्

* * * *

यदि मरणसंशये ब्रह्मविदाप्नोति परम्, भृगुर्वै वारुणिः, इत्येतावनुवाकौ ब्रह्मविदो दक्षिणे कर्णे जपति तस्यायुषः प्राणं सन्तन्विति वा । प्रेते-मात्यान् केशान् प्रकीर्य ।

End :

भूम्यां पांसूनुद्धृत्य तैः कृष्णाजिने पुरुषाकृतिं कृत्वा मधुना सर्पिषा वा संसिच्य विधिना द(दा)हयेदिति विज्ञायते ।

* * * *

यमयज्ञं दिष्टगमनात्यन्त ।

(*b*) गौरीन्द्राणीपूजा.

GAURĪNDRĀṆĪPŪJĀ.

Foll. 13*a*—14*b*.

On the mode of worship of Pārvatī, Indrāṇī (Indra's wife) and other goddesses performed with a view to secure the longevity of married persons.

Incomplete.

Beginning :

प्राणानायम्य शुभे मुहूर्ते दम्पत्योरायुष्याभिवृध्यर्थं गीरी[री)न्द्राणी-पूजां करिष्ये इति सङ्कल्प्य,

गौरी रमा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥

आवाहनादिषोडशोपचारपूजां कुर्यात् ।

End :

बृहत्सामेत्यस्य मन्त्रस्य कुत्स ऋषिः, रुद्रो देवता, त्रिष्टुप् छन्दः, मेधाविधारणे विनियोगः । बृहत्साम . . . सगरेण रक्ष । यस्य स्मृत्या तु ।

R. No. **379.**

Palm-leaf. 15¾ × 1¼ inches. Foll. 30. Lines, 7 in a page. Grantha and Tamil. Slightly injured.

Purchased in 1911–12 from the Sarasvatī-Bhāṇḍāgāra of Triplicane.

रहस्यचरमश्लोकचन्द्रिका.

RAHASYACARAMAŚLŌKACANDRIKĀ.

This contains the successive chapters on the same subjects contained in two treatises, viz., Rahasyacandrikā and Caramaślōkacandrikā, written alternately. They treat of the differences in doctrine between the Vaḍagalai and the Tengalai sects of the Śrī-Vaiṣṇavas, the former work being by Pelāpūrdīkṣita and the latter by Śuddhasattvadāsa. It is noteworthy that the treatment of the subjects in the two works is so much alike that the language is identical except when they have to express a difference of opinion and have to support the same by quotations.

Incomplete.

Beginning:

रहस्यत्रयसारस्य प्रक्रिया तन्यते लघुः ।
पेलापूर्दीक्षितेनेयमुत्तमश्लोकचन्द्रिका ॥

प्रथमं श्रीमद्रहस्यत्रयसारश्रवण एव मोक्ष इति प्र(तिपा)द्यते तदनुसारेणैवोत्तमश्लोकनिर्णयः श्रेयस्कर इति वक्तुम् । तथाहि—उत्तारकरुचिपरिगृहीतार्थ एव प्रपन्नैः श्रेयस्कामैः उपादेय इ(त्यत्र स)र्वेषामविवादः । वचनानि च भवन्ति—

'को धर्मः सर्वधर्माणां भवतः परमो मतः ॥'
'एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ॥'

इत्यादीनि । तत्र द्वयोपदेष्टैव उ(त्तारकः) । न हि द्वयोच्चारणमेव वा द्वयमेव वा उत्तारकम्, द्वयस्याभावार्थत्वेनाफलजनकत्वात्, फलाजनकस्य चाकरणात् ।

* * * *

Colophon:

इति रहस्यचन्द्रिकायां द्वयोपकारकत्वप्रकाशिका नाम प्राथमिकी कला संपूर्णा ॥

श्रीमद्वचनभूषायाः प्रक्रिया तन्यते लघुः ।
शुद्धसत्त्वाख्यदासेन चरमश्लोकचन्द्रिका ॥

प्रथमं श्रीवचनभूषणश्रवणवतामेव मोक्ष इति प्रतिपाद्यते तदनुसारेणैव चरमश्लोकार्थनिर्णयः श्रे(यस्क)र इति वक्तुम् ।

* * * *

Colophon:

इति चमरश्लोकचन्द्रिकायां मन्त्ररत्नोत्तारकत्वप्रकाशिका नाम प्राथमिकी कला संपूर्णा ॥

* * * *

इति चरमश्लोकचन्द्रिकायां मन्त्ररत्नविधायकत्वप्रकाशिका नाम द्वितीया कला ॥

* * * *

इति रहस्यचन्द्रिकायां द्रमिडोपनिषदां केवलश्रुत्यर्थत्वप्रकाशिका नाम तृतीया कला ॥

* * * *

इति चरमश्लोकचन्द्रिकायां द्रमिडोपनिषद्विधायकत्वप्रकाशिका नाम तृतीया कला ॥

* * * *

इति रहस्यचन्द्रिकायां शारीरकरहस्यतात्पर्यग्रहत्वप्रकाशिका नाम चतुर्थी कला ॥

* * * *

इति चरमश्लोकचन्द्रिकायां द्रमिडोपनिषद्रहस्यविवरणत्वप्रकाशिका नाम चतुर्थी कला ॥

* * * *

इति रहस्यचन्द्रिकायां रहस्यत्रयसारोत्तारकत्वप्रकाशिका नाम पञ्चमी कला ॥

* * * *

इति चरमश्लोकचन्द्रिकायां श्रीवचनभूषणोत्तारकत्वप्रकाशिका नाम पञ्चमी कला ॥

* * * *

इति रहस्यचन्द्रिकायां त्यागविधौ अनुष्ठानविरोधप्रकाशिका नाम षष्ठी कला ॥

* * * *

इति चरमश्लोकचन्द्रिकायां त्यागानुवादे आज्ञाकैङ्कर्यहानिप्रदर्शिका नाम षष्ठी कला ॥

* * * *

इति रहस्यचन्द्रिकायां त्यागविधौ गद्यत्रयोक्तिविरोधप्रदर्शिका नाम सप्तमी कला ॥

End:

इति चरमश्लोकचन्द्रिकायामनुवादपक्षे त्रिविधविकल्पापत्तिप्रकाशिका नाम अष्टमी कला ॥

अथ वाक्यभेदापत्तिः प्रतिषिध्यते—तत्रैवं पूर्वपक्षवादी मन्यते यदि ह्यत्र परित्यज्येति प्रतिषेधः स्यात् ततो वाक्यभेदः स्यात् ।

* * * *

नाप्यन्वयमात्रं विधीयते । स्थानापत्त्या कस्यचित् पदस्य विधानन पदान्तरनिषेधप्राप्तिसंभवेऽपि एवकारोपव ।

R. No. **380.**

Palm-leaf. $18\frac{1}{4} \times 1\frac{5}{8}$ inches. Foll. 161. Lines, 10 in a page. Telugu. Slightly injured.

Purchased in 1911–12 from C. Viśvanātha Śāstrigal of Vizianagaram.

(*a*) जीवन्मुक्तिविवेकः.

JĪVANMUKTIVIVĒKAḤ.

Foll. 1*a*—48*a*. Fol. 48*b* is left blank.

Same work as the one described under No. 4579 of the D.C.S. MSS., Vol. IX.

Complete.

The scribe gives the date of transcription and his name:

वृषनामसंवत्सरे माघमासे शुद्धाष्टम्यामिन्दुवासरे श्रीरामयोगीश्वर-स्वामि . . . . . नां जीवन्मुक्तिप्रकरणं लिखित्वा अ. ति. नरसिंहभट्टेन समर्पितम् ॥

(b) उपदेशसाहस्री—सव्याख्या.

UPADĒŚASĀHASRĪ: WITH COMMENTARY.

Foll. 49*a*—161*a*. Fol. 161*b* is left blank.

The text is the same as that of the work described under No. 4565 of the D.C.S. MSS., Vol. IX, but the commentary here is by Ānandajñāna, a disciple of Śuddhānanda.

Complete.

End:

विशेषश्चात्मनोऽद्वयत्वविषयाणां द्वयस्यासत्त्वार्थानि च सर्वाण्युपनिषद्वाक्यानि पौनःपुन्येनालोचयितव्यानीत्याह—आत्मनश्चाद्वयत्वविषयाणि द्वयस्यासत्त्वार्थानि च सर्वाण्युपनिषद्वाक्यानि विस्तरशः समीक्षितव्यानि समीक्षितव्यानीति । अभ्यासो ग्रन्थस्य गद्यपद्यात्मनः समाप्त्यर्थः ॥

परिसंख्याप्रकरणं समाप्तम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य[स्य]गोविन्दभगवत्पूज्यपादशिष्य-[स्य]श्रीमच्छङ्करभगवत्पूज्यपादकृतमुपदेशसहस्रिकाख्यं प्रकरणं समाप्तम् ॥

उपदेशसहस्रीयं गद्यपद्यमयी मया ।
व्याकृता व्याकृताप्यन्यैर्मन्दानुग्रहसिद्धये ॥

व्याक्रियासत्क्रिया सेयं कुर्व(रु)ता(त्) शम(र्म)निर्मलम् ।
कृतानां कृतविद्यानामाश्रिता पुरुषोत्तमम् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दभगवत्पूज्यपादशिष्य[स्य]-भगवदानन्दज्ञानकृता श्रीमदुपदेशसहस्रिकाटीका समाप्ता ॥

यत्पादाम्बुजचञ्चरीकधिषणानिर्वाणदुर्गादिगा-
पङ्क्तिर्मुक्तिनिसर्गदुर्गदुरितावाचंमया(यमा)नामियम् ।
यस्मिन्नित्यमियं शमादि समभूद्बोधाङ्कुरो मे यतः
शुद्धानन्दमुनीश्वराय गुरवे तस्मै परस्मै नमः ॥

The scribe gives the date and his name of transcription :

वृषनामसंवत्सरे फाल्गुनमासे . . . श्रीपरमहंसपरिव्राजकाचार्याणामखण्डसच्चिदानन्दनित्यपरिपूर्णानां सिंहगिरिगुहानिवासिनां श्रीरामयोगीन्द्रस्वामिनामुपदेशसहस्रिका नाम पुस्तकं अ. ति. नरसिंहभट्टेन लिखित्वा वेङ्कटेश्वरार्पितं दत्तवान् ॥

R. No. **381.**

Palm-leaf. $15\frac{1}{8} \times 1\frac{1}{8}$ inches Foll. 60. Lines. 7 in a page. Telugu. Slightly injured.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḻ of Vizianagaram.

काव्यप्रकाशिकाव्याख्या— ऋजुवृत्तिः.

KĀVYAPRAKĀŚIKĀVYĀKHYĀ : ṚJUVṚTTIḤ.

A commentary on the Kārikā portion of Kāvyaprakāśikā, a well-known work on poetics and rhetoric by Mammaṭa: by Narasiṁhasūrin, son of Timmāji Mantrin and grandson of Raṅgaprabhu of Vellamakoṇḍa family.

Ullāsas one to three, complete ; fourth, incomplete.

Beginning :

कान्ते साग(द)रवीक्षिते विवलितग्रीवं समीपं गते
रोमाञ्चश्रमवारिगोपनचणं वक्रोक्तिसंभाषिणे ।

सश्वासं शपथोद्यमे धृतरुते भ्रूभङ्गि चालिङ्गिनि
व्यामोहस्थिरतारकं विजयते सात्राजितीचेष्टितम् ॥

श्रीमद्वेल्लमुकोण्डवंशजलधेरासीद्यशःकौमुदी-
धौताशेषजगत्तमाः शुचिरुची रङ्गप्रभुश्चन्द्रमाः ।

तत्सूनुर्गुणरत्नरोहणगिरिः शास्त्रप्रवीणो बुधः
श्रीमानर्थिसुरद्रुमो विजयते तिम्माजिमन्त्रीश्वरः ॥

तस्यास्मि सूनुरमलप्रतिभश्च दृश्यश्रव्यप्रबन्धरचनाचतुरः कलावान् ।
वक्ता मृदूक्तिभिरलंकृतदर्शनानां कर्ता पुनः कृतिकृते नरसिंहनामा ॥

काव्यप्रकाशिकोक्तानि सूत्राणि स्फुटमुद्धरन् ।
कारिकारूपिणां तेषामृजुवृत्तिं करोम्यहम् ॥

इह तावत्प्रारिप्सितकाव्यमीमांसाशास्त्रनिष्प्रत्यूहपरिपूरणाय कविभार-तीमेवैतच्छास्त्रप्रतिपाद्यतया प्रस्तुताभिमतत्वेन समुचितेष्टदेवतां मन्वान-स्तत्प्रणामलक्षणं मङ्गलं व्यञ्जनामुखेन कविर्दर्शयति—नियतीति । कवे-र्भारती जयति सर्वोत्कर्षेण वर्तते । निर्मितिं निर्माणमादधती । कीदृग्विधां तां नियम्यतेऽनेनेति नियतिः, कमलत्वादिसामान्यं तया कृतो यो नियमस्तेन रहिताम् । मुखादेः कमलत्वादिना ताद्रूप्यरूपणादिति भावः ।

End:

रसप्रतीतिस्थले च वक्त्राद्यौचित्याभावेन गुणपारतन्त्र्यस्याविकल-त्वात् ॥

Colophon:

इति श्रीनरसिंहसूरिविरचितायां काव्यप्रकाशिकामूलसूत्रव्याख्या-यामृजुवृत्तिसमाख्यायां तृतीय उत्साहः समाप्तः ॥

गुणे निरूपिते अलंकाराः प्राप्ता इति अवसरसंगत्या अलंकारे निरूपणीये शब्दार्थयोर्मध्ये.

* * * *

अन्यथा अन्यप्रकारेण योज्यत इति सा ।

R. No. **382.**

Palm-leaf. 17⅛ × 1⅜ inches. Foll. 227. Lines, 6 in a page. Telugu. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

प्रायश्चित्तसुधानिधिः.

PRĀYAŚCITTASUDHĀNIDHIḤ.

Same work as the one described under No. 3490 of the D.C.S. MSS., Vol. VII, the end being different.

Breaks off in Durgādānapaddhati.

End :

ध्यानम्—

खड्गत्रिशूलपाणिं च वरदाभयसंयुताम् ।
हरा(हार)ग्रैवेयमकुटीरत्नताटङ्कभूषिताम् ॥
दिव्याम्बरावृतां देवीं महिषोपरि संस्थिताम् ॥

R. No. **383.**

Palm-leaf. 15½ × 1⅜ inches. Foll. 53. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

The first five leaves are left blank.

(*a*) जैमिनिसूत्राणि.

JAIMINISŪTRĀṆI.

Foll. 6*a*—10*b*.

A treatise on astrology and horoscopy; by Jaimini. Same work as the one described under R. No. 371(*g*) *ante*.

Breaks off in the first Pāda of the second Adhyāya.

Beginning

उपदेशं व्याख्यास्यामः—अभिपश्यन्ति ऋक्षाणि । पार्श्वभे च (तन्निष्ठाश्च तद्वत् ।) दारभाग्यशूलस्थार्गलानि ध्यातुः । कामस्था तु भूयसा पापानाम् ।

End :

गोपनमन्येभ्यः । शुभवर्गेऽपवादमात्रम् । द्विग्रहे कुलमुख्यः ॥

Colophon :

इति श्रीजैमिनीये योगाध्यायस्य चतुर्थः पादः ॥ अध्यायश्च समाप्तः प्रथमः ॥

आयुः पितृदिनेशाभ्याम् । प्रथमयोरुत्तरयोर्वा दीर्घम् । . . . . प्राणिनि शुभदृष्टे रुद्रशूलान्तमायुः । तत्रापि शुभयोगे ।

(b) जैमिनिसूत्रवृत्तिः.

JAIMINISŪTRAVṚTTIḤ

Foll 11*a*—53*b*.

This is a commentary on the work of Jaimini described above: by Bālakṛṣṇānandasarasvatī, who salutes, in the introductory stanzas, Gōpālānanda, Svayamprakāśa and Śrīdhara.

Breaks off in the first Pāda of the second Adhyāya.

Beginning :

वन्दामहे महीयांसमंसलम्बिजटाधरम् ।
यत्कङ्कणझणत्काररवः शब्दा . . ॥
भावयानो हृदि श्रीमद्गोपालानन्ददेशिकान् ।
श्रीमत्स्वयंप्रकाशार्यान् श्रीश्रीधरगुरूनपि ॥

सम्यग्व्यञ्जयितुं समस्तजगतां कर्मानुरूपं फलं .
संपूर्णानि विचित्रभावनिचयैर्नाना(विधान्या)तनोत् ॥
सूत्राणि स्फुरिताखिलर्षिहृदयान्यालोक्य योऽसौ मुनिः
सोऽयं नः पुरतः सदा विजयतां नाम्ना मुनिर्जैमिनिः ॥

. . .

उपदेशमित्यादि जैमिनीयं सूत्रनिकरमयं जातकम् । तस्याल्पग्र-(न्थत्वा)द्विवृतिरारभ्यते । उपदेशं व्याख्यास्यामः । उपदिश्यत इत्युपदेशः रहस्यार्थः कर्मानुरूपेण शुभाशुभसूचनप्रकारः तं व्याख्यास्यामो विशेषेण निरूपयिष्याम इति प्रतिज्ञासूत्रम् ।

End:

द्विग्रहे कुलमुख्यः । यत्र क्वापि द्विग्रहयोगे सति कुलमुख्यो भवति । इदमुपलक्षणम्, शास्त्रान्तरोक्तानां त्रिग्रहादियोगानामन्येषां नानाविधानां तत्तत्फलानां चेति वेदितव्यम् ।

Colophon:

इति श्रीबालकृष्णानन्दसरस्वतीविरचितायां जैमिनीयसूत्रवृत्तौ योगाध्यायस्य चतुर्थः पादः ॥ प्रथमोऽध्यायश्च समाप्तः ॥

अध्या(था)युर्दायोपायं दर्शयति—आयुः पितृदिनेशाभ्याम् ।

* * * *

रुद्रशूलान्तायुर्दायहेतौ समुत्कर्षं कंचन दर्शयति—तत्रापि शुभयोगे ।

R. No. **384.**

Śrītāla. 11½ × 2 inches. Foll. 125. Lines, 9 in a page. Kanarese. Good.

Purchased in 1911–12 from G. Śrīnivāsa Rao of Mysore.

(*a*) कविराक्षसीयम्.

KAVIRĀKṢASĪYAM.

Foll. 1*a*—7*b*.

A collection of 105 stanzas on seven subjects mentioned in the second stanza quoted below In the two stanzas found at the end of the commentary on this work described under (*b*) below, it is stated that Giriyappa collected together the stanzas of Kavirākṣasa.

Complete.

Beginning:

सत्प्रभुपद्धतिः—

त्रयीयुवतिसीमन्तसीमासिन्धू(न्दू)रबन्धवः ।
संसाराब्धिं पि(प)चेयुर्वः कंसारेः पादपांसवः ॥
